सिद्धिस्थानम्

प्रथमोऽध्यायः

रिक्तकोष्ठस्य वमने व्यापदः

रिक्तकोष्ठस्य वमने मारुतः सम्प्रकुप्यति
प्लीहा प्रचलति स्थानात्तस्माद्दोषान्निहन्त्यसून् १

शोधनौषधप्रयोगक्रमः

पेयां मराडं पिबेत्तस्मात्सुस्निग्धं लवणान्वितम्
सौम्ये तिथौ मुहूर्ते च नक्षत्रे करणे शुभे २
शुक्लवस्त्रः शुचिर्भूत्वा ह्यर्चयित्वा द्विजन्मनः
ततोऽस्मै वमनं देयं पूजयित्वा भिषग्वरान् ३
प्राङ्मुखेन तु पातव्यं निवाते शरणे शुभे
न चास्य कुर्यादायासं मराडं भोज्यं प्रशस्यते ४
विधिरेष भवेत्कार्यो वमने च विरेचने

वमनक्वाथमात्रा

निष्क्वाथस्य त्रयः प्रस्थाः मागधास्तु कनीयसि ५
ज्येष्ठे तु पुरुषे ज्येष्ठं वमनं न कनीयसि
चतुःप्रस्थं तु मध्यं स्याज्ज्येष्ठं प्रस्थास्तु ते नव ६
कनीयो मध्यमं ज्येष्ठं त्रिविधानि पृथक् पृथक्

अपीतपूर्वविषये वमनमात्राविशेषः

अपीतपूर्वं वमनं विरेको वापि येन तु ७
कनीयसा प्रमाणेन परीक्षेत च बुद्धिमान्
त्रिपलं श्रेष्ठमाख्यातं कनीयस्तु पलं भवेत् ८
मध्यमं द्वे पलै विद्यादिति मे निश्चिता मतिः

विषयभेदेन मात्राभेदाः

विषकुष्ठहता ये तु कासश्वासप्रपीडिताः ९
तरुणा बलवन्तश्च वामयेदुत्तमेन तान्
मध्यमे प्राणवयसि मध्यमं तत्र कारयेत् १०
कनीयसि कनीयस्तु तथा प्राणे कनीयसि
विपरीतं प्रयुञ्जानो न रोगान्विजयिष्यति ११
उपद्रवान्वा जनयेदातुरं वा विनाशयेत्

वमनयोगाः

अङ्कोलस्याथ निम्बस्य निष्क्वाथं साधु योजयेत् १२
सर्पिषा भेषजैश्चैमैः सुखोष्णं शीतमेव वा
मदनस्य फलं पिष्ट्वा देवदालीफलैस्सह १३
निम्बपत्राणि सार्द्राणि सैन्धवं मरिचानि च
सैन्धवेन समायुक्तं तक्रमण्डेन वा पुनः १४
बन्धुजीवोऽथ पिप्पल्यो मदनं सर्पिरेव च
तत्कषायेण संयुक्तं प्रधानं वमनौषधम् १५
मदनं बन्धुजीवश्च शतपुष्पा शुकानना
सैन्धवेन समायुक्तं प्रधानं वमनौषधम् १६
मदनस्य च पत्राणि पुष्पाणि सफलानि च
सैन्धवं बन्धुजीवश्च राजकोशातकानि च १७
एवं प्रच्छर्दनो योगः प्रधानं वमनौषधम्
श्रेष्ठश्च विषयुक्तेषु कासश्वासे तु पूजितः १८

वमनायोगे छर्दनोपायाः

यदा तु वमनं पीतं न छर्दयति मानवम्
किं तत्र भेषजं कुर्यात् कथं वैद्यः समाचरेत् १९

दर्शयेत्तस्य तु भिषक् पालितानि पृथक् पृथक्
मक्षिकाकेशचूर्णानि तच्च मण्डे नियोजयेत् २०
एतेन तु प्रयोगेण क्षिप्रं छर्दयते नरः
एषा क्रिया समाख्याता दुर्बलानां विशेषतः २१

प्रवृत्तवेगे उपचारः

हृदयं पृष्ठदेशं च विगृह्य च वमेन्नरः
तथास्य चलति स्थानात्पीतं ह्यस्मिन्नुपक्रमे २२

वमने दोषनिर्गमक्रमः

कफं हि पूर्वं वमति ततः पित्तमनन्तरम्
पित्तस्यान्ते भवेद्वातः ततो वमति शोणितम् २३

सम्यग्वान्तलक्षणम्

लक्षणानि तु वक्ष्यामि सम्यग्वान्तस्य देहिनः
लघुरामाशये शुद्धिर्हृच्छुद्धिश्चाप्यतन्द्रिता २४
क्षुत्पिपासे यथाकालं स्रोतःशुद्धिर्यथाग्निता
श्लेष्मिकाणां च सर्वेषां व्याधीनां विनिवर्तनम् २५
न च वैरस्यमास्यस्य सम्यग्वान्तस्य लक्षणम्

वमनातियोगलक्षणम्

हृल्लासोऽथ सिराहर्षो मन्या कण्ठश्च दीर्यते २६
अत्युद्गारस्तमः कासो हिक्का श्वासः स्वरक्षयः
वातज्वरः शुष्कवमिस्तृष्णा शूलो ह्यनिद्रता २७
आस्यहृच्छोषणं चैव क्षताच्च रुधिरागमः
इन्द्रियाण्युपरुध्यन्ते मूर्च्छा चायोपजायते २८
हनुस्तम्भश्च कम्पश्च ह्यतिवान्ते प्रवर्तते

अवम्या वम्याश्च

ऊर्ध्वरक्ती प्रमेही च गुल्मी चार्शोभगन्दरी २९
उदरी पाण्डुरोगी च हृद्रोगी कृमिकोष्ठकः
अपस्मारी विषार्तश्च शोफस्तम्भश्च वातिकः ३०
विषमज्वरवीसर्पी वातशोणितिकश्च यः
अर्शोऽतिविषमाग्निश्च कुष्ठश्वयथुपीडितः ३१
उदावर्ती तथोन्मादी पिप्लुव्यङ्गनिपीडितः
पित्तश्लेष्मसमुत्थानां व्याकुला ये च धातवः ३२
सन्निपातसमुत्थाश्च योनिदुष्टाश्च याः स्त्रियः
शूलार्ता रक्तगुल्मिन्यो याश्च सौम्येन पीडिता ३३

सम्यग्विरिक्तलक्षणम्

अस्निग्धारक्तताङ्गानां लाघवं गात्रमार्दवम्
हृदयोद्गारमूत्राणां शुद्धिर्वातानुलोमतः ३४
प्रसन्नस्वरवर्णत्वं बुभुक्षा व्याधिनिग्रहः
श्लेष्मणा च स्वयं स्थानं सुविरिक्तस्य लक्षणम् ३५

दुर्विरिक्तलक्षणम्

उदरं वातसम्पूर्णं कण्डूमण्डलसम्भवः
पिटकाजन्म गात्रेषु भ्रमणं ज्वरसम्प्लवः ३६
हृदयावेष्टनं वह्नेः सादस्स्यात्कुक्षिगौरवम्
कृच्छ्रविण्मूत्रवातत्वं दुर्विरिक्तस्य लक्षणम् ३७

अतिविरिक्तलक्षणम्

पार्श्वशूलं गुदभ्रंशः शाखासंकोचसम्भ्रमः
वातवृद्धिर्विसंज्ञत्वं गुदशूलस्तृषा क्लमः ३८
शून्यता जर्जरीभावस्ततश्चिमचिमायनम्

रूपारयतिविरिक्तानां शूलः शोफश्च जायते ३६

दुर्विरिक्तादीनामुपक्रमः

गौरवे दुर्विरिक्तस्य यदजीर्णं तदुल्लिखेत्
सात्म्यं तु पेयं भैषज्यं निरूहो गाढवर्चसाम् ४०
रूपारयतिविरिक्तस्य हरेत्त्क्षीरघृतादिभिः
स्नेहैश्चैवोपनाहैश्च साभ्यङ्गैश्च भिषग्जयेत् ४१

द्वितीयोऽध्यायः

अ्रथ शिरोविरेचनस्सिद्धिर्द्वितीया

नस्यभेदाः

अ्रवपीडानुवासाश्च धूमाः प्रधमनानि च
चतुर्विधं नस्यमाहुः पृथक्त्वेन तु मे शृणु १

शिरोविरेचनसाध्यव्याधयः

गलग्रहो रोहिणिका शङ्कोऽर्धावभेदकः
प्रतिश्यायश्च कासश्च श्वासो हिक्का बिडालिका २
मुखरोगो ह्यपस्मारो दन्ततालुकविद्रधी
दन्तपुप्पुटकश्चैव पूतिनासामुखं तथा ३
अ्रभिष्यन्दाश्च चत्वारस्तन्द्रा ये नेत्रसंभवाः
सार्बुदाश्चाप्यधीमन्थाः नासार्शश्च भगन्दराः ४
उपजिह्वा गलग्रन्थिः कराठशालूक एव च
गलशुष्ठिकालसके कार्यं शीर्षविरेचनम् ५

शीर्षविरेचनद्रव्याणि

मरिचानि विलङ्गानि पिप्पल्योऽथ फणिज्जकः
क्षवको यवनश्चैव शिग्रुबीजं मयूरकः ६

हिङ्गु सौवर्चलं भार्ङ्गी नक्तमालफलानि च
ज्योतिष्मती शृङ्गिवेरं शैरीषं बीजमेव च ७
एतच्छीर्षविरेकार्थमुक्तव्याधिषु योजयेत्
अवपीडेऽथ धूमे वा द्वन्द्वशः सर्वशोऽपि वा ८
एतैरेवौषधगणैस्तैलं धीरो विपाचयेत्
अविमूत्रेण संयुक्तं श्रेष्ठं शीर्षविरेचनम् ९
धूमं च सर्वगन्धानां नतकुष्ठविवर्जितम्
धूमवर्तिं पिबेत्तावच्छ्रेष्ठं शीर्षविरेचनम् १०

शिरोविरेकगुणाः

शिरसस्तु विरेकेण कर्णजिह्वाक्षिनासिकाः
विशुध्यन्ते यथादोषं मुखनासावहेषु च ११
विवृतिः खेषु विशदा न च श्लेष्मा प्रसिच्यते
सम्यक् शिरसि संशुद्धे वेदना चोपशाम्यति १२
व्याधौ च भङ्गचूर्णत्वं स्रोतसां सुविशुद्धता

शोधनस्यातियोगे व्यापत्

तथैवातिविशुद्धेषु स्रोतस्स्वायस्यते शिरः १३

तैलसर्पिर्नस्यार्हाः

दन्तचाले हनुस्तम्भे मन्यास्तम्भे शिरोग्रहे
बाधिर्ये कर्णशूले च कर्णमूलाच्च भेदने १४
अपतन्त्रे केशसादेऽप्रबोधे दृष्टिविभ्रमे १५
गण्डोष्ठमुखचालेषु काचेषु तिमिरेषु च
दौर्गन्ध्ये मुखनासाभ्यां पालित्ये वाप्यकालजे १६
ऊर्ध्वजत्रुगता ये च रोगास्सम्परिकीर्तिताः
नस्यकर्म हितं तेषां तैलं वा सर्पिरेव वा १७

जीवकादिनस्ययोगः

जीवकर्षभकौ द्राक्षा पिप्पल्यो मधुकं बला
प्रपौरण्डरीकं मेदा च शर्करा नीलमुत्पलम् १८
निदिग्धिका चांशुमती नीलिका सैन्धवं वचा
रास्ना श्वदंष्ट्रा मञ्जिष्ठा बृहती सपुनर्नवा १९
एभिः पलसमैः सिद्धं तैलं वा यदि वा घृतम्
चतुर्गुणेन पयसा नस्यं तत्परमुच्यते २०
नस्यतः स्नेहपानेन कृष्णारोमा दृढेन्द्रियः
अवलीपलितव्यङ्गः चक्षुष्माञ्जायते नरः २१
कर्णाक्षिनासावक्त्राणां स्नेहेनावृत्य तर्पणम्

स्नेहनावनसम्यग्योगलक्षणम्

इन्द्रियाणां विमुक्तत्वं प्रसादः स्वरवर्णयोः २२
स्रोतसां विमलत्वं च ज्ञेयं संस्निग्धलक्षणम्

नस्यास्निग्धलक्षणम्

अस्निग्धलिङ्गं रूक्षत्वं स्रोतसां रिक्तता तथा २३

नस्यातिस्निग्धलक्षणम्

शिरसो गुरुदःखत्वं स्रोतसां स्नेहपूर्णता
कर्णतालूपदेहश्च नस्यातिस्निग्धलक्षणम् २४

नस्यानर्हाः

नाजीर्णे नार्द्रशिरसि पन्थानं गन्तुमिच्छतः
न पीतमात्रे पानीये ज्वरितस्य न दापयेत् २५
न मैथुनं गतवतः मद्यपीतस्य नैव च
नातिभुक्तस्य नास्निग्धस्विन्नस्यानिर्वृतेस्तथा २६

निरूहस्य सम्यग्योगादिलक्षणानि

सम्यङ् निरूढस्य न रुग्रुजा सम्यक् प्रशाम्यति
यतो मूत्रपुरीषाभ्यां वातो ह्यस्य निवर्तते २७
निरूढं तं भिषग्विद्यादनिरूढस्य लक्षणम्
तथैव व्याधिराध्मानं शूलं विरामुत्रनिग्रहः २८
पूर्णकुक्षित्वमानाहो दुर्निरूढस्य लक्षणम्
निरूढस्य पुनर्यस्य शोणितं सम्प्रदुष्यति २९
अतीव तु निरूढस्य निष्पुरीषस्य मारुतः
शूलेनावेष्ट्यमानस्य सर्वगात्राणि पीडयेत् ३०
इति पञ्चविधं चोक्तं व्याख्यातं समुपाचरेत्
पञ्चकर्मविधानज्ञो राजार्हो भिषगुच्यते ३१
इत्याह भगवानात्रेयः

इति भेले द्वितीयोऽध्यायः

चतुर्थोऽध्यायः

अथातो दशव्यापदीयां वमनविरेचनसिद्धिं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

शोधनद्रव्यकल्पनानिर्देशः

अधोभागोर्ध्वभागानि भेषजानि प्रयत्नतः
कल्पयेन्मतिमान्वैद्यो विषशस्त्रानिभानि तु १
कटुतिक्तकषायाणि विदाहीनीतराणि च
सूक्ष्माण्युष्णानि तीक्ष्णानि विष्यन्दीनि गुरूणि च २

शोधनद्रव्याणां कार्मुकत्वप्रकारः

तानि सम्प्राप्य हृदयं धमनीः प्रतिपद्य हि

तिर्यगूर्ध्वमधश्चैव दोषान्निष्पन्दयन्त्यपि ३
सूक्ष्माच्छरीरावयवान् सौक्ष्म्यादनुसरन्ति च
विस्रावयन्ति धातूंश्च विमार्गैरपि देहिनाम् ४
आनयन्तीव हृदयं दोषांस्तानतिमूर्च्छितान्
आमाशयं पूरयित्वा ह्यूर्ध्वभागभवांस्तथा ५
एवमेव च विष्यन्दीन्यापूर्यामाशयं पुनः
अधोभागे प्रवर्तन्ते विकारेष्विह देहिनाम् ६
विष्यन्दयन्ति दोषांश्च यावत्तिष्ठन्ति देहिनाम्
संशोधयन्त्यतः पश्चादूर्ध्वं वा यदि वाप्यधः ७

शोधनविभ्रंशजा व्यापदः

तेषां तु दुष्प्रयुक्तानां विभ्रान्तानां विधावताम्
अयोगाच्चातियोगाच्च जायन्ते व्यापदे दश ८
परिस्रावस्तथाध्मानं विबन्धे गुदनिःस्रवः
हृद्रोगश्चैव शूलं च तथैव परिकर्तिका ९
जीवादानं शिरोरोगो दशमी च प्रवाहिका
तासामेकैकतस्सिद्धिं व्यापदां तु निबोध मे १०

वमनविरेचनायोगे उपक्रमः

अथैति पीतं वमनं तच्च तीक्ष्णतरं पिबेत्
अनुपानान्न सिद्धिश्च सशोध्यास्थापयेन्नरम् ११
असिध्यति विरेकेऽपि भूयस्तमनुवासयेत्
अस्मिन्नपि जरां याति त्र्यहादूर्ध्वं पिबेद् घृतम् १२
स्नेहस्वेदोपपन्नश्च लघु च प्रतिभोजितः
विरेचनं च वमनं नरस्तीक्ष्णतरं पिबेत् १३
यदा विरेचनं पीतं वमनायोपपद्यते

प्रयोग एवं वमने विरेकेऽपि च यः स्मृतः १४

दशव्यापदां निरूपणम्

स्नेहस्वेदविमुक्तं च क्रूरकोष्ठं च देहिनम्
अजीर्णे चौषधं पीतमाध्यापयति मानवम् १५
लङ्घितस्य सुभक्तस्य रूक्षस्यानशनस्य च
परिकर्तः परिस्रावः प्रलेपोऽस्वेदितस्य च १६
स्नेहस्वेदविमुक्तस्य मृदुकोष्ठस्य देहिनः
दोषास्तथावशिष्टास्तु जनयन्ति प्रवाहिकाम् १७
अतिरौक्ष्यादतिस्नेहादौषधानां न सम्भ्रमात्
नृणां शूलं प्रभवति गुदस्रंसश्च दारुणः १८
वमने रेचने वापि पीते वेगविधारिते
वातपित्तकफाः क्रुद्धाः कुर्वन्ति हृदयग्रहम् १९
तस्य गात्राणि सीदन्ति क्लमः शूलश्च दारुणः
शिरोग्रहश्च कोष्ठार्तिर्विसंज्ञश्च भवत्यपि २०
स्विन्नस्य मृदुकोष्टस्य स्नेहितस्य विरेचनम्
अतिमात्रौषधं पीतं जीवादानाय कल्पते २१
सृजेच्छुक्लं स शकृता कृष्णं वा रक्तमेव वा
लोध्रपुष्पसवर्णं वा भण्डपूष्पनिभं तथा २२
प्रविरिक्तो यदा शीतां क्रियां समुपसेवते
शरणानि च शीतानि वारि शीतं च सेवते २३
स्रोतांसि कुपितो वायुस्तस्य चावृत्य तिष्ठति
खरीभवति तेनास्य दोषाः स्कन्दन्ति देहिनः २४
वातमूत्रपुरीषाणामप्रवृत्तिस्तृषा ज्वरः
विबन्ध एष व्याख्यातो भिषजां बुद्धिविभ्रमात् २५
अस्निग्धं तु यदा रूक्षमौषधं पाययेद् भिषक्

गृह्णाति कुपितस्तस्य सर्वगात्राणि मारुतः २६
कटिपृष्ठशिरोग्रीवाहृदयं च यदानिलः
प्रपद्यते तदा मोहं चित्तनाशं च गच्छति २७
दशैता व्यापदः प्रोक्ता रूपैर्नानाविधैः पृथक्

अयोगजव्यापदां चिकित्सा

चिकित्सां तासु कुर्वीत यथात्रेयस्य शासनम् २८
तत्रायोगिनमभ्यज्य तैलेन लवणेन च
सङ्करप्रस्तरस्वेदैर्नाडीस्वेदैरथापि वा २९
सम्यङ्निरूढं विश्रान्तं परिषिच्य सुखाम्बुना
जाङ्गलेन रसेनैव भोजयेन्मृदुमोदनम् ३०
फलतैलेन कोष्णेन ततस्तमनुवासयेत्
आध्मानं परिकर्तश्च परिस्रावश्च शाम्यति ३१
सालो रूबूकस्त्रिफला दन्ती चित्रक एव च
सर्पिरेभिर्विपक्वं च पाययेच्च यथाबलम् ३२
तत्स्नेहपीतं सुस्निग्धं स्वेदकर्मोपपादितम्
वमनं रेचनं वापि पाययेत्तीक्ष्णमौषधम् ३३
हृद्रोगो गात्रहर्षश्च शीर्षस्कन्धग्रहस्तथा
विबन्धः परिकर्तश्च शूलश्चानेन शाम्यति ३४
परिकर्तः परिस्रावो यथातत्त्वेन शाम्यति
कषायबस्तिं प्रणयेत्पिच्छाबस्तिमथापि वा ३५
शृतं मधु घृतं वापि क्षीरबस्तिं प्रदापयेत्
जीवनीयोपसिद्धेन सर्पिषा चानुवासयेत् ३६
एरण्डमूलं त्रिफला द्राक्षा काश्मर्यमेव च
एभिः शृतं पयो दद्याद्द्विविधैरपि मिश्रयेत् ३७

यावशूको भवेत्क्षारः सैन्धवं साम्लवेतसम्
हिङ्गु दाडिमसारश्च पिप्पल्यो विश्वभेषजम् ३८
सर्पिषा पयसा वापि मद्येनोष्णोदकेन वा
पीतं निवर्तयेच्छूलं तीव्रं च परिकर्तिकाम् ३९
देवदारु सबिल्वं च रास्ना कर्कटकाह्वया
एरण्डोऽप्यथ पूतिश्च तैलमेभिर्विपाचयेत् ४०
तेनानुवासयेच्चैनं तदा सम्पद्यते सुखम्
गात्रस्तम्भश्च शूलश्च परिकर्तश्च शाम्यति ४१
उपद्रवाणामेतेषां शान्तिर्यदि न विद्यते
तेषां चिकित्सितं कुर्याद्यथास्वं स्वं चिकित्सितम् ४२
एवं चिकित्सितं प्रोक्तमयोगे विस्तरेण मे

अतियोगजव्यापच्चिकित्सा

अतियोगे तु वक्ष्यामि व्यापदां यच्चिकित्सितम् ४३
अतिप्रवृत्तौ वमने विरेचनमुपाचरेत्
विरेचने चातियुक्ते वमनं पाययेद् भिषक् ४४
वमने चातियुक्ते तु कार्यमास्थापनं भवेत्
उभयोरतियोगे तु स्तम्भनं हितमुच्यते ४५
उल्लिखेत्क्षौद्रयुक्तेन स नरस्तण्डुलाम्बुना
पादौ च सेचयेद्धस्तौ तथा वाप्यवगाहयेत् ४६
लामज्जकमृणालैश्च चन्दनैश्च सपद्मकैः
सन्दिह्यात्सर्वगात्राणि कषायैश्चावसेचयेत् ४७
धातकी मधुकं लोध्रं पद्मं मोचरसस्तथा
नीलोत्पलं समङ्गा च कट्फलं पद्मकेसरम् ४८
एतैर्लोहितशालीनां सिद्धां पेयां सुशीतलाम्
पिबेन्माक्षिकसंयुक्तं तदस्य स्थापनं परम् ४९

लाक्षा लोध्रस्समङ्गा च माक्षिकं कमलोत्पलम्
आजेन पयसा पीतं रक्तस्तम्भनमुच्यते ५०
रसं कपित्थपत्रस्य पाययेन्मधुसंयुतम्
पयसा बादरं द्राक्षां मधुना च पिबेन्नरः ५१
रसाश्च जाङ्गला देया व्यक्ता दाडिमसारकैः
घृतदाडिमसंयुक्ता देयाः स्युः क्षीरबस्तयः ५२
अतिप्रवृत्ते रक्ते तु रक्तमेवानुवासयेत्
शाशं मार्गमथौरभ्रं छागं माहिषमेव वा ५३
ओदनं पयसामृद्य परिपूतं समाक्षिकम्
पिबेदिक्षुरसैर्वापि परिमद्यौदनं पुनः ५४
न्युग्रोधोदुम्बरप्लक्षवेतसाश्वत्थजैस्तथा
शृङ्गैरथैषां क्षीरेण यवागूः स्थापनं परम् ५५
पद्मं शाल्मलिनिर्यासः समङ्गा धातकी तथा
जम्ब्वाम्रसारो मधुकः लाजा लाक्षा प्रियङ्गवः ५६
एतैः शृतं पयः पेयं यवागूं चापि पाययेत्
तण्डुलोदकयुक्तानि पिबेद्वा मधुना सह ५७
ओदनः कोरदूषाणां मधुना सस्यसंभृतः
पलङ्कषासमायुक्तश्चातिसारं निवर्तयेत् ५८
संयुक्तं तिलतैलेन सप्तरात्रस्थितं दधि
कोरदूषौदनोपेतमतिसारप्रणाशनम् ५९
सप्तरात्रं स्थिते तक्रे मूलकं साधयेद्भिषक्
कोरदूषौदनो योज्यः तेनातीसारनाशनः ६०
वटाङ्कुरो मोचरसो लोध्रमाम्रास्थिकन्दकः
तरुणानि च बिल्वानि धातकीकुसुमानि च ६१
पञ्चरात्रस्थिते तक्रे यूषमेभिस्तु कारयेत्

कोरदूषौदनो योज्यः तथातीसारनाशनः ६२
नीलोत्पलं नीलतिलाः समङ्गा लोध्रमेव च
क्षीरं विपाचयेदेभिरतीसारविनाशनम् ६३
तिलतैलं तथा लोध्रमाजं क्षीरं विपाचयेत्
प्रवाहिका गुदभ्रंशः सर्वमेतेन शाम्यति ६४
बला चातिबला बिल्वमेरण्डश्चोरकस्तथा
एभिर्विपाचयेत्क्षीरं कफपित्तप्रणाशनम् ६५
हनुस्तम्भे च पातव्यमर्शःशूले च दारुणे
अनेनैव च कल्केन कुर्यादाच्छादितं शिरः ६६
तेन मूर्च्छा भ्रमश्चैव प्रशाम्यति शरीरिणाम्
उपद्रवाश्च येऽप्यन्ये तेषां तत्तच्चिकित्सितम् ६७
शर्करापद्मकोशीरन्यग्रोधोदुम्बरास्तथा
एभिर्विपाचयेत्क्षीरं तृष्णादाहप्रणाशनम् ६८
क्षीरबस्तिं विदद्याच्च पिच्छाबस्तिमथापि वा
अतियोगे प्रशस्यन्ते शीताश्च घृतबस्तयः ६९
जीवादानचिकित्सायां यत्पूर्वं परिकीर्तितम्
तत्कर्तव्यं गुदभ्रंशे तथा सम्पद्यते सुखम् ७०
वातशूले तु सञ्जाते सङ्करप्रस्तरादिकान्
स्वेदांश्चैवोपदेहांश्च स्वभ्यक्तानां प्रयोजयेत् ७१
वचां श्वदंष्ट्रां पूतीकां पञ्चमूलीं च साधिताम्
यदि वाऽऽस्थापनं दद्यात्सुखोष्णं चानुवासनम् ७२
क्षारैः क्षारघृतैश्चापि शूलघ्नैस्समुपाचरेत्
दाधिकं षट्पलं वापि पाययेन्मात्रया घृतम् ७३
एवमेव विबन्धेऽपि विधिं कुर्याच्चिकित्सकः
याश्च व्यापत्तयः पश्चाद्वमने च विरेचने ७४

ताश्चिकित्सेत मतिमान् यथा स्वे स्वे चिकित्सिते

विरेचनौषधस्य वमनापादने हेतुः

ग्राम्यानूपौदकं मांसं स्नेहितो योऽपि सेवते ७५
कफे प्रवृद्धे तस्याशु विरेको वमनं भवेत्
अजीर्णे चौषधं पीतमल्पं वा यदि वा बहु ७६
उत्क्लेशे चोर्ध्ववाते च दुर्युक्ते वापि भेषजे
एवं विरेचनं पीतं वमनायोपपद्यते ७७

छर्दनौषधस्य विरेकापादने हेतुः

कर्शिते रूक्षिते वापि सुकुमारे सुदारुणे
असंजातकफस्यैव न च स्निग्धस्य देहिनः ७८
छर्दनं वा स्थितं क्षुब्धं विरेकायोपपादयेत्

तत्रोपक्रमसूत्रम्

तत्रानुपानमेवाहुः केचित्केचित्त्वसाम्प्रतम् ७९
भेषजं ह्यतिमात्रं तु जीवादानाय कल्पते
ऊर्ध्वं दशाहात्परतः स्नेहस्वेदोपपादितम् ८०
पाययेत्तीक्ष्णमेवैतं भेषजं कल्पकल्पितम्
सिद्धिर्विरेचनस्यैषा वमनस्य च कीर्तिता
व्यापदश्च चिकित्सा या यथावदनुपूर्वशः ८१
इत्याह भगवानात्रेयः

इति भेले सिद्धिस्थाने चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

अथातो बस्तिमात्रीयां सिद्धिं व्याख्यास्याम इति ह स्माह
भगवानात्रेयः

बस्त्यर्हाणां विषये मतभेदाः

संसृष्टभक्ते शंसन्ति बस्तिकर्म चिकित्सकाः
विरिक्तेष्वपरे वैद्या निरूढेत्वपरे जनाः १

अत्रार्थे भेलाचार्याणामाशयः

त्रीण्येतान्यवराण्याहुः न शंसन्ति विशारदाः
मतं तेषामहं सम्यग्व्याहनिष्यामि हेतुभिः २
सततन्तु विरिक्तस्य शीतीभवति पावकः
हृदाश्रयाणि स्रोतांसि गुदकोष्ठाश्रयाणि च ३
प्रवृद्धो मारुतस्तस्य पक्वाधानं प्रधावति
शीतीकरोति कायाग्निं बलं चास्यापकर्षति ४
स्रोतस्सु शुद्धाशुद्धेषु यदि बस्तिः प्रदीयते
स गम्भीरो गतः काये सर्वशो न निवर्तते ५
छर्दिं पिपासां हृद्रोगं पाण्डुत्वं श्वयथुं तथा
जनयेदिह तस्माद्धि विरिक्तं नानुवासयेत् ६
संसृष्टभक्तस्य पुनः जातदोषस्य देहिनः
स्रोतस्सु मललिप्तेषु भवेत्स्नेहो निरर्थकः ७
तीक्ष्णेतरनिरूहेण निरूढस्य शरीरिणः
समुत्क्लिष्टेषु दोषेषु स्नेहबस्तिर्न शस्यते ८

अनुवासनप्रयोगे केषांचिन्मतम्

केचिच्चापि शरीरस्य रात्रिर्पर्युषितस्य च
प्रशान्ता दोषसंज्ञानः प्रशंसन्त्यनुवासनम् ९

बस्तिकर्मविधानम्

बस्तिकर्मविधानं तु शृणु मे निरुपद्रवम्
स्नेहितस्य यथान्यायं विरिक्तस्य च कल्पशः १०

संसृष्टभक्तस्य तथा पुनश्च स्नेहितस्य च
पञ्चरात्रात्परं तस्य कारयेदनुवासनम् ११
नोपर्यस्निग्धकोष्ठस्य कर्तव्यमनुवासनम्
वातो ह्यूरीकृतस्तस्य हृदये परितिष्ठति १२
उचिताद्भक्तमानादप्यर्धमात्रं तु भोजयेत्
तनुना मुद्गयूषेण जाङ्गलेन रसेन वा १३
भुक्त्वा कृतसमाश्वासः शकृन्मूत्रे विसृज्य च
सव्येन पार्श्वेन नरः संविशेच्छयने समे १४
संकोचयेद्दक्षिणं च सक्थिं वामं प्रसारयेत्
वामोपधानं कुर्वीत शिरस्युपहितं नरः १५
अथास्य प्रणयेद्बस्ति पृष्ठवंशानुगं सुखम्
यथाकर्मबलं चैव न द्रुतं न विलम्बितम् १६
निर्व्यलीको मृदुबस्तिर्व्यपनीतानिलस्तथा
गाढानिलानुबन्धेऽस्याप्रशस्तो बस्तिकर्मणि १७
नेत्रं बस्तिमुखे धृत्वा सम्यगेकेन पाणिना
प्रपीडयेच्चापरेण हस्तौ चापि न कम्पयेत् १८
पूर्वं च गुदमभ्यज्य यन्त्रं हस्तौ च मानवः
प्रवर्तयेदथोत्तानं पादौ वास्य प्रसारयेत् १९
मुहूर्तान्न निगृह्णीयाद्दत्ते बस्तौ यथासुखम्
ततः परमतो वेगानागतान्न विधारयेत् २०

अनुवासनसिद्धिलक्षणम्

अविबन्धस्सवातश्च सपुरीषस्स सिध्यति

बस्तिप्रयोगे नियमः आवस्थिकोपचाराश्च

दत्तमात्रे पुनर्यस्य तैलबस्तिर्निवर्तते २१

न स कार्यकरः प्रोक्तस्तस्यान्यं प्रणिधापयेत्
तृषितस्स तथा रात्रिं काल्यमुष्णोदकं पिबेत् २२
एकान्तरे च दातव्यो बस्तिर्न सततं नृणाम्
अभ्यङ्गोन्मर्दनं चैव कोष्णतोयावसेचनम् २३
उष्णोदकानुपानं च बस्तिकर्मणि शस्यते

अनुवासितस्य निरूहविधिः

चतुर्षु त्रिषु वा वैद्यो यावद्वा स्निग्धता पुनः २४
स्नेहबस्तिषु दत्तेषु कुर्यादास्थापनं ततः
आर्द्रीकृतेषु स्रोतस्सु स्नेहेन विहितेन च २५
शुद्धये स्रोतसां दद्यान्निरूहान्युक्तितः सुखम्
अशुद्धे मलिने कोष्ठे स्नेहबस्तिः प्रयोजितः २६
प्रदर्शयति वैशिष्यं शुक्ले पर्वव्ययीकृतम्

बस्तौ विरेचनोपचारातिदेशः

विरेचनोपचारश्च कर्तव्यो बस्तिकर्मणि

यवागूप्रतिषेधः

यवागूप्रतिपानं च बस्तिकर्मणि वर्जयेत्

कर्मबस्तयः

चतुर्विंशतिसङ्ख्याताः निरूहास्सानुवासनाः २८
एतत्कर्मेति निर्दिष्टमूर्ध्ववाते प्रदापयेत्

रोगानुगुणबस्तिविधिः

मृदुमध्यमतीक्ष्णेषु रोगेषु कुशलो भिषक् २९
मृदुमध्यमतीक्ष्णं च बस्तिकर्म च कारयेत्

बस्तौ वर्ज्यानि

ग्राम्यानूपौदकं मांसं पिष्टान्नं पललं दधि ३०
अम्लशाकविकारांश्च भक्ष्याणि विविधानि च
शीतोदकस्य पानं च तथा शीतावगाहनम् ३१
गुरूणि चान्नपानानि बस्तिकर्मणि वर्जयेत्

बस्तौ सेव्यानि

शालिषष्टिकमुद्गांश्च भोजनार्थं प्रदापयेत् ३२
व्यञ्जनार्थं प्रदेयाः स्युः शशतित्तिरिलावुकाः

बस्तिप्रशस्तिः

ज्ञानवान्सुमिताहारो वैद्यशूश्रूषुरेव च
यश्च बस्तिमुपासीत स जीवेच्छरदां शतम् ३३
इत्याह भगवानात्रेयः

इति भेले सिद्धिस्थाने पञ्चमोऽध्यायः

षष्ठोऽध्यायः

अथात उपकल्पसिद्धिं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

बास्त्युपकल्पादि निरूपण प्रतिज्ञा

उपकल्पमतो बस्तेर्नेत्रं स्नेहं च सर्वशः
तेषां प्रयोगयुक्तिं च क्रियां कर्म च मे शृणु १
बालानामथ वृद्धानां युवमध्यमवयोस्तथा
स्वस्थानामातुराणां च बस्तिकर्म प्रशस्यते २

बस्तेस्सर्वार्हत्वम्

बस्तिनेत्रम्

सौवर्णं राजतं ताम्रं कांस्यं त्रपुजमायसम्

शृङ्गवंशास्थिवंशाग्राग्रयाहुर्नेत्राणि पण्डिताः ३
यथाक्रममथैतानि प्रधानानीतराणि च
उत्तमाधममध्येषु मनुष्येषु प्रयोजयेत् ४
गुलीकास्यं तु नेत्रं स्यादनूनद्वादशाङ्गुलम्
अङ्गुले कर्णिकावासः तां च न क्रमयेद्गुदे ५
तत्र गोपुच्छसंस्थानं सुश्लक्ष्णं सुखकर्णिकम्
प्रदेशिनीपरीणाहं दानं तेन प्रशस्यते ६

बस्तिनिवृत्तिकालः

तत्र मात्राशतं स्थित्वा स्वेनैव विनिवर्तते

नवस्नेहादिकृता दोषाः

यद्यकाले नवस्नेहो मद्यमांसप्रकल्पितः ७
न्यूनकालनिवृत्तश्च शीघ्रत्वान्न निरूहति

मध्यमः निवृत्तिकालः

ततस्तु मध्यमः किञ्चिन्निवर्तेत शतैस्त्रिभिः ८

अनिवृत्तौ तीक्ष्णेन प्रत्यानयनम्

एवं कालगतिक्रान्तो यो बस्तिर्न निवर्तते
तीक्ष्णेनास्थापनेनैवं क्षिप्रं प्रतिनिवर्तते ९
तस्मात्तीक्ष्णतरं बस्तिं पूर्वमेवोपकल्पयेत्
प्राणसंधारणे ह्युच्चैर्विबन्धो न प्रशस्यते १०

कालादिज्ञानस्यावश्यकता

तस्मात्कालं च यो व्याधिं निरूहाणां बलाबलम्
पूर्णरूपं च यो वेत्ति स मोहं न निगच्छति ११

दुर्युक्तबस्तिगर्हणम्

न तथा ह्यन्तयो हन्यान्नाशनिर्न हुताशनः
दुष्प्रयुक्तो यथा बस्तिः प्राणैस्सद्यो वियोजयेत् १२

निवृत्तानिवृत्तयोः शुभाशुभत्वम्

शस्तः प्राणिहितो बस्तिस्सद्यो रोगहरस्तथा
सम्यङ् निवृत्तो रोगौधैर्ह्यनिवृत्तस्तु प्राणहा १३
स निवृत्तस्तु वेगेन दोषान् गम्भीरमास्थितान्
उन्मार्गस्थान्नयेन्मार्गं मार्गस्थांश्चानुलोमयेत् १४

चिकित्सार्धं कृत्स्ना चिकित्सा वा बस्तिः

बस्तिवेगोऽनिलं हन्ति पर्जन्यं च यथानिलः
कफपित्तविकाराहि सर्वे वातवशानुगाः १५
अशीतिर्वातिका रोगाश्चत्वारिंशत्तु पित्तजाः
विंशतिः श्लैष्मिकाश्चापि संसृष्टानामसंग्रहात् १६
सर्वेषामेव चैतेषां रोगाणां संग्रहैस्सदा
अर्दितानां हि भूतानां बस्तिरग्र्यं परायणम् १७
अनिलप्रभवा ह्येते सर्वे बस्तिवशानुगाः
तस्मादर्धं चिकित्सायाः सर्वं वा बस्तिरुच्यते १८

चतुर्मासं बस्तिसेवायां सर्वरोगाभावः

यस्तु बस्तिं निषेवेत चातुर्मास्यं सदा नरः
रोगास्संवर्जयेयुस्तं सिंहावासं यथा गजाः १९
एते गुणविशेषाश्च व्याख्याता बस्तिकर्मणि

निरूहप्रशंसा

निरूहस्यास्य सामर्थ्यमुपचारं च मे शृणु २०
स्विन्ने पर्युषिते जीर्णे त्वत्यन्तं च निरूहयेत्
सोऽस्य मूत्रं पुरीषं च श्लेष्माणं चापकर्षति २१

वातानुलोम्यं कुरुते बलं सञ्जनयत्यपि
विषस्थिरं दोषबलं यच्च नाडीषु संस्थितम् २२
विशोधयति तत्सर्वं निरूहः स प्रयोजितः
रोगानीकस्य सर्वस्य परो नास्ति ह तत्समः २३
व्याकुलानां च केशानां सीमान्तकरणं यथा
तथा भृशं व्याकुलानां दोषाणां स्यान्निरूहतः २४
निरूहो हि समायुक्तस्सम्यग्वीर्यस्समैर्गुणैः
व्याधीनथोद्धरेत्क्षिप्रं पुण्यं युक्तं नरं यथा २५

निरूहार्हाः

कृच्छ्रमूत्रपुरीषाणां शूलिनां वातगुल्मिनाम्
विरेचनाद्युदावर्ते हृद्रोगे पार्श्वशूलिनि २६
उदरेषु प्रमेहेषु कुष्ठेषु कृमिकोष्ठिषु
श्लेष्मणा सह संसृष्टे शोणितेन च दूषिते २७
संसृष्टेषु च सर्वेषु सन्निपातोद्भवेषु च
गम्भीरा धातुगा ये च तेषां श्रेष्ठं निरूहणम् २८

निरूहसिद्धिलक्षणम्

यदा कफं विरिच्येत शङ्खस्फटिकसन्निभम्
ऋते मूत्रपुरीषाभ्यां तन्निरूहस्य लक्षणम् २९

निरूढस्यानुवासः

सुशोधितं निरूहेण नातिपर्युषितं तथा
सुखोषितं समाश्वस्तं भोजितं चानुवासयेत् ३०

बस्तेरमृतकल्पत्वम्

एकतो बस्तिकर्माणि ह्येकतोऽन्यच्चिकित्सितम्
अमृतार्थं बस्तिकर्म कुरुते सुप्रयोजितम् ३१

बस्तेर्वृष्यत्वादि

शुक्लं बह्ववरोधस्य न क्षयं याति देहिनः
स्त्रीषु प्रधर्षणं कुर्यान्नराणां क्षीणरेतसाम् ३२
हन्याद्वातरजः स्त्रीणां वन्ध्या गर्भं लभेत च
बस्तिप्रयोगात् षण्डोऽपि पुमान् भवति सर्वशः
कृशानामपि मर्त्यानां मांससंजननं स्मृतम् ३३
इत्याह भगवानात्रेयः

इति भेले सिद्धिस्थाने षष्ठोऽध्यायः

सप्तमोऽध्यायः

अथातः फलमात्रासिद्धिं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

बस्तौ मदनस्य श्रैष्ठ्यम्

फलमात्रं निरूहेषु श्रेष्ठमाहुर्मनीषिणः
तेषां तु मदनं श्रेष्ठं प्रवदन्ति चिकित्सकाः १

बस्त्यर्हफलविषये मतानि भेलाचार्याशयश्च

जीमूतकं प्रशंसन्ति केचिद्धामार्गवं तथा
कृतवेधनमित्येके कुटजं प्राहुरप्यथ २
गर्हितास्सर्व एवैते वादाः प्रत्येकशः स्मृताः
भेषजानां च सङ्घातो निरूहेषु प्रशस्यते ३

दोषानुगुणनिरूहनिरूपणप्रतिज्ञा

वातपित्तकफघ्नांस्तु निरूहांश्चानुपूर्वशः
व्याख्यास्यामो यथान्यायं सन्निपातहिताश्च ये ४

वातघ्नो निरूहः

द्वे पञ्चमूल्यौ कोलानि नलदश्शुष्कमूलकम्

द्विपलीनानि सर्वाणि जलद्रोणे विपाचयेत् ५
अष्टभागावशेषं तु कषायमवतारयेत्
कल्कपेष्याणि चेमानि भेषजानि समावपेत् ६
निकुञ्चिकां खरपुष्पां पिप्पलीं सैन्धवं वचाम्
त्रपुसोर्वारुबीजानि शतपुष्पां यवानिकाम् ७
कुष्ठं च तगरं चैव यष्टीमधुकमेव च
सक्षीररससकषायश्च सगोमूत्रश्च कीर्तितः ८
सतैलश्च निरूहः स्याद्वातरोगविनाशनः

पित्तहरः निरूहः

पटोलपत्रमूलं च पिचुमन्दं शतावरीम् ९
त्रायमाणां बलां रास्नां बृहतीं कण्टकारिकाम्
गूडूचीं त्रिफलां श्यामां सारिवां वंशकत्वचम् १०
द्विपलीनान् पृथग्भागान्पूर्वकल्पेन साधयेत्
मधुकं वंशकफलं शतपुष्पां दुरालभाम् ११
महासहामंशुमतीं कल्कं कुर्यात्पृथक् पृथक्
क्षीरेणाथ कषायेण घृतेन मधुना तथा १२
कल्पमिश्रः सुमथितो निरूहः पित्तनाशनः

श्लेष्मघ्ननिरूहः

दशमूली करञ्जौ द्वौ दन्ती चित्रकमेव च १३
एकाष्ठीला तुरङ्गी च त्रिफला देवदारु च
पूतिकं रौहिषं श्यामा मूर्वा राजतृणानि च १४
पृथक् पञ्चपलानेतान् साधयेत्सर्वकल्पवित्
अधोभागोर्ध्वभाग्द्रव्यैस्साधयेत्साधु योजितैः १५
मूत्रतैलयुतः श्रेष्ठः निरूहः श्लेष्मनाशनः

अश्वगन्धादिनिरूहः

अश्वगन्धां बलां रास्नां श्वदंष्ट्रां सपुनर्नवाम् १६
पटोलपञ्चमूल्यौ च भार्ङ्गीं श्यामां शतावरीम्
गूडूचीं त्रिफलां शिग्रुं कर्णिकायाः फलानि च १७
उशीरं रजनीपत्रं पूतिकं कत्तृणानि च
पृथक् पञ्चपलानेतान् खण्डशश्छेदयेत् भिषक् १८
जलद्रोणे विपक्तव्यमष्टभागावशेषितम्
मधुकं शतपुष्पां च सैन्धवं सर्षपान् गुडम् १९
हपुषामजमोदां च मदनस्य फलानि च
वचामशोकबीजानि पिप्पलीकुष्ठमेव च २०
एतानि कल्कपेष्याणि भेषजानि पृथक् पृथक्
क्षीरतैलसमायुक्तो घृतमूत्रसमन्वितः २१
खजेन मथितः पूतःस निरूहः प्रशस्यते

पृथग्दोषसंसर्गसन्निपातेषु युक्त्या कल्पनविधिः

एकेन यदि वा द्वाभ्यां त्रिभिर्वातिप्रमाणतः २२
किंचिन्न्यूनातिरिक्तं वा ज्ञात्वा व्याधिबलाबलम्

विषयभेदेन बस्तिद्रव्यमात्रा

विंशतिवर्षाणां तत्र प्रस्थप्रमाणतः २३
अथ द्वादशवर्षाणामर्धप्रस्थं प्रयोजयेत्
कषायकुडवं चात्र षड्वर्षाणां प्रयोजयेत् २४
युक्तं लवणतैलाभ्यां क्षीरेण मधुना तथा
कषायबस्तिं कुर्वीत स्नेहाद् द्विप्रसृतं भिषक् २५
प्रसृतं मध्यमे कुर्यात्प्रसृतार्धं कनीयसि

अतिशीतादिबस्तिप्रयोगे दोषाः

नातिशीतं न वात्युष्णं कषायमुपकल्पयेत् २६
वायुः कुप्यति शीतत्वादत्युष्णं तु गुदं दहेत्
अतिसान्द्रातिग्रथितो दोषेण स हि मूर्छति २७
मदप्रवेगो भवति व्यापच्चास्योपजायते
अथवापि तनुर्यस्य कषायो योजितो भवेत् २८
सोऽल्पं हरति दोषं च न च संशोधयेद् गुदम्
परिकर्तं च शूलं च जनयेच्च प्रवाहिकाम् २९
अन्त्यर्थमधुरो दत्तो विदग्धस्तम्भवेदनाम्
ग्रहणीं रक्तमर्शांसि पाण्डुरोगं भगन्दरम् ३०
अतितीक्ष्णस्तु दुर्युक्तः क्षिप्रं प्रतिनिवर्तते
न निर्हरति दोषांश्च ज्वरं मूर्छां करोति च ३१

निरूहे अवस्थानुसारेण विशेषः

ज्वरितं दह्यमानं च मूर्छमानं च मानवम्
शीतैर्मधुरसंयुक्तैर्योजयेत्क्षीरबस्तिभिः ३२
यस्याथ लवणः कोष्ठे निरूहः पैत्तिकीं रुजाम्
जनयेत्तत्र पेष्यं स्यान्मधुरेण निरूहणम् ३३
निरूहो मधुरो यस्य श्लेष्माणं परिकोपयेत्
कटुकैश्च कषायैस्तं निरूहेद्यस्य मारुतः ३४
प्रकुप्येदधिकं तत्र मारुतघ्नं निरूहणम्
तस्माल्लवणयुक्तानि द्रव्याणि मधुराणि च ३५
भिषग्दद्यान्न शीतानि तथोष्णानि विवेचयेत्

शीतोष्णनिरूहविषयाः

पित्ते शीतो निरूहः स्यादुष्णस्तु कफवातयोः ३६
प्रश्लेष्मणि प्रवाते वाप्युष्णमास्थापनं भवेत्

निरूहे फलतैलादिविधिः

मदनस्य फलं पिष्ट्वा तैलेनाच्छेन साधयेत् ३७
तन्निरूहे प्रशंसन्ति फलतैलं चिकित्सकः
गोमूत्रयुक्तमेतत्तु फलतैलनिरूहणम् ३८
निरूहं लवणं कुर्याच्छ्रेष्ठमानाहभेदनम्
बिल्वैरण्डफलं वापि पचेद् द्विप्रस्थसम्मितम् ३९
अम्लं सलवणं साध्यमष्टभागावशेषितम्
कषाये तत्र पीलूनि कल्कपेष्याणि योजयेत् ४०
फलतैलयुतो बस्तिर्देयं आनाहभेदनः
एष सर्वानुदावर्तान् शोफगुल्मान् भिनत्त्यपि ४१
अथैव बस्तिराध्मानमुदावर्तं विनाशयेत्

पिच्छाबस्तियोगौ

ओष्ठजिह्वं पृष्ठच्चूर्णं बृहतीं कण्टकारिकाम् ४२
चन्दनं पद्मकं चैव वृन्तं पुष्पं च शाल्मलेः
खण्डितानां यवानान्तु कुडवं तत्र योजयेत् ४३
तदैकध्यं पचेत्सर्वं जले चाष्टगुणे भिषक्
घृतेन मधुना चैव पिच्छां संयोज्य शक्तितः ४४
निर्वाहिकायां शंसन्ति पिच्छाबस्तिमिमं बुधाः
अतस्तु षोडशी चैव पले द्वे च पुनर्नवे ४५
कटाहके पञ्चमूलीं यवैः सह विपाचयेत्
उपोदकायाः क्षुण्णायाः स्वरसं च सुपीडितम् ४६
युक्तं तेन कषायेण घृतेन सह योजयेत्
माक्षिकेण च संयुक्तो बस्तिस्तु यवमूर्च्छितः ४७
पिच्छाबस्तिरिति ख्यातः शूले निर्वाहिकासु च

क्षतक्षीणे निर्वाहिकादौ बस्तिः

तरुणं शिंशुपापत्रं कुर्बुदारस्य पल्लवम् ४८
क्षुरणैस्सह यवैस्सिद्धैः संपिष्टो घृतसंयुतः
माक्षिकक्षीरसंयुक्तः स बस्तिर्यवमूर्च्छितः ४९
निर्वाहिकां वातशूलं क्षतक्षीणस्य नाशयेत्

अध्यायार्थोपसंहारः

एते निरूहा व्याख्याताः सर्वरोगविनाशनाः
व्याकुलेषु विकारैस्तु तान् भिषक् संप्रयोजयेत् ५०
इत्याह भगवानात्रेयः

इति भेले सप्तमोऽध्यायः

अष्टमोऽध्यायः

अथातो दशव्यापदामास्थापनानुवासनसिद्धिं व्याख्यास्याम इति ह स्माह भगवानात्रेयः

बस्तिव्यापदः तच्चिकित्सा च

स्नेहबस्तिर्निरूहश्च द्विविधं याति विभ्रमम्
न युज्यते वा दुर्युक्तो युक्तो वाप्यतिपूर्यते १
तेषां विप्रतिपन्नानां बस्तीनां व्यापदो दश
तासां रूपं चिकित्सां च प्रवक्ष्याम्यनुपूर्वशः २
न माति वा गुदे युक्तो वातादिगदपीडिते
पुरीषेणावृते वापि स न गाढं प्रपीडितः ३
अर्शसा प्रतिसंरुद्धः श्लेष्मणा पिहिते गुदे
गुरुयन्त्रयुतो वापि नेत्रे वा जीर्णसर्पिते ४
न गच्छति गुदे बस्तिर्विभ्रान्तेषु च धातुषु

तमयोगमिति ब्रूयादतियोगं निबोध मे ५
वाताभिभूतपित्ते वा श्लेष्मणा वाहिताशिनः
पुरीषेणाभिभूतश्च दूरं चातिप्रपीडितः ६
न प्रत्यायात्यधो बस्तिर्भीतस्योन्मथितस्य वा
गुदवल्यां तृतीयायामर्शोभिर्वा निवारितः ७
विरेचितस्य वान्तस्य मद्यशोकाकुलस्य च
न प्रत्यायात्यधो बस्तिरूर्ध्वं वातिप्रवर्तते ८
तेषामुपद्रवा घोरा जायन्ते बस्तिविभ्रमात्
जीवादानं तृषाच्छर्दिः हृद्रोगः श्वयथुस्तथा ९
शूलमर्शासि पाण्डुत्वं श्वासोऽथ परिकर्तिका
एषां प्रत्येकशो रूपं चिकित्सां च निबोध मे १०
गुरुकोष्ठस्य रूक्षस्य बहुदोषस्य देहिनः
अस्निग्धस्य गुरुव्याधेर्यदि बस्तिः प्रदीयते ११
अत्यल्पो वाथ रूक्षो वा शीतवीर्यौषधस्तथा
लवणस्नेहरिक्तो वा तनुस्सान्द्रोऽथ वा भृशम् १२
सम्बद्धबहुदोषस्य दोषानुत्क्लेशयत्यपि
तत्रस्था यत्र सर्पन्ति दोषास्ते पीडिता भृशम् १३
कटावस्थ्यूरुजङ्घे च पादपृष्ठोदरे तथा
प्रस्यन्दन्ते भवेच्चास्य सशूलमुदकोदरम् १४
बस्तिशूलमुदावर्तो गुदशोषो ज्वरस्तथा
निष्ठीवकासहृल्लासा भक्तद्वेषो विवर्णता १५
स्निग्धस्य तस्य स्विन्नस्य संकरप्रस्तरादिभिः
निरूहं कारयेत्तीक्ष्णममोघाप्रतिवारणम् १६

बिल्वादिनिरूहः

बिल्वाग्निमन्थस्योनाककाश्मर्याश्च सपाटलाः

रास्ना बलागोक्षुरकयवकोलकुलुत्थकाः १७
एतत्सर्वं समाहृत्य जलद्रोणे विपाचयेत्
चतुर्भागावशिष्टं तं कषायमवतारयेत् १८
कल्केन सर्षपाणां च पीलूनां मदनस्य च
सयवासकषायं तु तत्तैललवणेन च १९
मूत्राणि च यथालाभमथ सम्यङ्ग निरूपयेत्
यथा तूतिबला ---- २०
तत्र वादित्रशब्दांश्च श्रेयसश्च स्वनानपि
शान्ति पुण्याहघोषांश्च कुर्याच्चापि प्रदक्षिणम् २१
तं निधाय शुभे कुम्भे बस्तिं दद्यात्प्रमाणतः
देवप्रसादतो बस्तिरर्दितानां महागुणः २२
सर्वरोगहरो वृष्यः क्षतक्षीणरुजापहः
वातपित्तसमुत्थाना रोगा ये परिकीर्तिताः २३
कामदाहज्वराद्यांस्तान्नाशयेदविशङ्कितः
त्रिभागमाक्षिको ह्येष वलीपलितनाशनः २४
रूपवर्णकरः पुंसां बलमांसविवर्धनः

शतावर्यादिरसायनबस्तिः

शतावरीं सहचरं रास्नां गोक्षुरकं बलाम् २५
शतं शतं कल्पयित्वा तोयद्रोणशते पचेत्
द्रोणावशेषितं तच्च परिपूतं निधापयेत् २६
बर्हिकुक्कुटहंसानां मांसान्यपि पृथक्पृथक्
वसा माहिषवाराहमेषाणां प्रस्थसम्मितम् २७
विदार्यामलकेक्षूणां रसप्रस्थाः पृथक् पृथक्
तत्र तैलघृतप्रस्थौ क्षीरमष्टगुणं भवेत् २८

तद्गोमयाग्निना युक्त्या कल्केनानेन साधयेत्
तुगाक्षीर्यामलक्यौ च द्राक्षामधुकचन्दनैः २९
मधूलिकापटोलाभ्यां पत्रं नीलोत्पलस्य च
विशालां च मृणालं च कपिकच्छुफलानि च ३०
खर्जूरौदनपाक्यौ च शीतपाकीं निदिग्धिकाम्
सलामञ्जत्वचं पत्रं ह्रीबेरं समहासहम् ३१
जीवकर्षभकौ मेदां पिप्पलीश्चापि संहरेत्
तत्सिद्धं शीतलीकृत्य क्षौद्रप्रस्थे नियोजयेत् ३२
तत्र वादित्रशब्दांश्च कुर्यात्स्वस्त्ययनानि च
गजस्कन्धं समारोप्य श्वेतच्छत्रानुपालितम् ३३
चेलावृतं च कुर्वीत साधुशब्दांश्च सर्वशः
ततोऽस्मिन् दापयेद्बस्तिं पुण्येऽहनि रसायनम् ३४
बस्तिनानेन दत्तेन गच्छेन्नारीशतं नरः
न वात्र यन्त्रणा काचिदुक्ता नारीविहारगा ३५
वृष्यो बलकरो बस्तिराप्त आयुर्विवर्धनः
वलीपलितखालित्यं सेवमानो नियच्छति ३६
षण्डांश्च पुरुषान् कुर्याल्लक्षणाढ्यान् गुणान्वितान्
क्षीणान् क्षतान्नष्टशुक्लान् विषमज्वरपीडितान् ३७
योनीनां व्यापदौ वन्ध्यां बस्तिरेष नियच्छति

रासायनिकबस्तिः

गुडूचीस्वरसप्रस्थं ग्राहयेद्यन्त्रपीडितम् ३८
शतावरीरसप्रस्थं तद्वत्सहचरस्य च
विदार्यामलकेक्षूणां द्राक्षाखर्जूरयोरपि ३९
पृथक् कुर्याद्रसप्रस्थं प्रस्थौ द्वौ तैलसर्पिषोः
आजमाहिषगव्यानि क्षीराणि द्विगुणानि च ४०

ज्ञुरणपिष्टानि चेमानि पेषयित्वा विपाचयेत्
वधूटिकामुच्चटां च मधुकं पिप्पलीमपि ४१
शृङ्गाटकं पुष्करिकां काण्डं नीलोत्पलस्य च
जीवकर्षभकौ मेदां बलां नीलोत्पलानि च ४२
तुगाक्षीरीं महामेदां पुण्डरीकस्य केसरम्
वृषमेषचकोराणां हंसकुक्कुटयोरिह ४३
जीवञ्जीवकमत्ताक्षकुररीक्रौञ्चबर्हिणाम्
वसा मज्जा च सत्त्वानां मेषमांसरसैस्सह ४४
विभागं माक्षिकं चैव युञ्ज्यात्सम्यग्विपाचिते
शङ्खभेरीनिनादैश्च पटहैर्वा मुरीस्वनैः ४५
आरोपयेद्गजस्कन्धे श्वेतच्छत्रध्वजायुतम्
सिद्धानां परमं देवं महर्षिगणसेवितम् ४६
शरणं सर्वभूतानामर्चयेद् वृषभध्वजम्
आशीभिर्मङ्गलाशंसिस्तुतिभिर्देवतार्चनैः ४७
रसायनानि सिध्यन्तिविपरीतानि चान्यथा
तं स्नेहं गमयेद्बस्तिं रासायनिकमुत्तमम् ४८
अथाहारविहारेषु च चैनं यन्त्रयेद्भिषक्
व्यापन्नयोनयो वन्ध्या रक्तगुल्मिन्य एव च ४९
या वाऽपत्यं मृतं सूते याश्च नष्टार्तवास्तथा
नष्टशुक्लक्षतक्षीणा विषमज्वरपीडिताः ५०
प्रक्षीणमांसरुधिरा वलीपलितपीडिताः
आशु प्रशमयेद्रोगान् तानायुर्मांसवर्धनम् ५१
रसायनमिदं श्रेष्ठं नराणाममृतोपमम्
रसायनविधानानि प्रोक्तान्येतानि यानि च ५२
सहस्रशतपाकानि कार्याणि विभवे सति

मधुकादिबस्तिः

मधुकं सैन्धवं कुष्ठं शतपुष्पा हरेणवः ५३
मदनानि च रास्ना च भार्ङ्गी नीपरकज्वलम्
मरि ----- ५४

मायूराद्यनिरुहाः

मायूरं कौक्कुटं वापि वेशवारं सुकुट्टितम्
सहितं दशमूल्यां तु जलद्रोणे विपाचयेत् ५५
रसस्य तस्य पूतस्य प्रस्थार्ध च प्रदापयेत्
वसातैलघृतानां तु मधुनः प्रसृतद्वयम् ५६
हपुषाशतपुष्पाणां मुस्तानां चापि कार्षिकम्
कल्कपेष्यं पुनर्दद्याद्बस्तिं सलवणं सुखम् ५७
पादगुल्फोरुजङ्घासु त्रिकवङ्क्षणबस्तिषु
शिश्ने वृषणयोश्चैव वातरोगं नियच्छति ५८
मृगाणां तित्तिराणां च तथैव बिलवासिनाम्
आनूपानां खगानां च कल्पमेवं प्रयोजयेत् ५९
तुल्यं मधु च तैलं च तस्मादुष्णोदकं समम्
द्वौ कर्षौ शतपुष्पाणां कर्षश्च लवणोत्तमः ६०
एष रासायनो बस्तिर्दीपनीयोऽथ बृंहणः
बलवर्णकरो वृष्यो यापनो निरुपद्रवः ६१
गुल्मोदावर्तिताध्मानप्रमेहकृमिकोष्ठिनाम्
नित्यं गाढपुरीषाणां बस्तिरेष हितः स्मृतः ६२
घृतं मधु च तैलं च तेषां मानं समं भवेत्
पूर्वकल्केन देयानि स बस्तिर्बलवर्णकृत् ६३
बस्तौ मेढ्रगते दोषे बस्त्यसात्म्यचिकित्सिते

पैत्तिके मूत्रकृच्छ्रे च पित्तव्याधिषु चोत्तमः ६४
तुल्यं घृतमथ क्षौद्रं तयोर्मांसरसस्समः
अक्षमात्रं च मुस्तानां स बस्तिः पूर्वकल्पवत् ६५
गुल्फोरुजानुपृष्ठेषु सर्वतः स्तम्भितेषु च
बलासपादहर्षेषु बस्तिः प्रशमनः स्मृतः ६६
बस्तौ वृषणमेढ्रेषु शूलमाशु नियच्छति
त्रिकजानूरुपृष्ठादिवेदनां चापकर्षति ६७

बस्त्यनिवृत्तौ निवर्तनविधिः

मृदुत्वान्न निवर्तन्ते क्षुभ्यन्ते बस्तयश्च वा
तीक्ष्णैरास्थापनं कार्यं क्षिप्रं प्रतिनिवर्तयेत् ६८

मृदुयापनबस्तिजव्यापत् प्रतिक्रिया च

मृदुत्वाद्यापनानां तु केचिद्विभ्रमभीरवः
दीपनानां कषायेण योजयन्ति चिकित्सकाः ६९
एवमन्येषु विभ्रान्तौ सनिरूहेषु वा पुनः

बस्तिसम्यग्योगप्रशंसा

बस्तयः कल्पदृष्टा हि यथा काले सुखावहाः ७०
क्षीणातिरिक्ता दूष्यन्ते तस्माद्योगं समाहरेत्
नित्यं नारीविहारामां क्षीणानामल्परेतसाम् ७२
एवमेव विधानं च रेतोबलविवर्धनम्

वाजीकरा बस्तयः

स्वेच्छाविहारान् वक्ष्यामि बस्तीन् शुक्लविवर्धनान् ७२
रसः कर्कटकानां तु शर्करामस्तुसंयुतः
घृतसौबर्चलयुतो बस्तिर्वृष्यतमः स्मृतः ७३
हंससारसलावानां तित्तिरिक्रौञ्चबर्हिणाम्

कल्पेनानेन कर्तव्या वाजीकरणबस्तयः ७४
पयः कुक्कुटमांसेन विपक्वं मधुसंयुतम्
चटकाण्डरसश्चैव कुक्कुटाण्डरसस्तथा ७५
घृतमाक्षिकसंयुक्तः शर्करासैन्धवैर्युतः
एष बस्तिः स्मृतो वृष्यः मांसशुक्लविवर्धनः ७६
एतश्शतं वा षष्टिं वा नारीर्गच्छति मानवः
एष वर्णबलोत्साहः स्थविरेऽपि प्रदृश्यते ७७
तिमिङ्गिले वा मकरे पाठीने नक्रमीनयोः
दुग्धं कूर्मेऽथकुम्भीरे कल्पयेच्छिशुमारवत् ७८

क्रीडाबस्तिः

वाराहवस्तवृषणौ वृषणौ गोवृषस्य च
चटकर्कटकांश्चैव क्षीरेण सह साधयेत् ७९
तन्निरूहं तु शुक्रेण बस्तानामथ मिश्रयेत्
उच्चटेक्षुरकं चात्र कल्कपेष्यं समावपेत् ८०
घृतमाक्षिकसंयुक्तं प्रणीतः शर्करायुतः
किञ्चिल्लवणितो बस्तिर्गमयेत्स्त्रीशतान्यपि ८१
एष नारीविहाराणां बह्वन्तःपुरवासिनाम्
रेतोबलकरः श्रेष्ठः क्रीडाबस्तिरनुत्तमः ८२
आत्मगुप्ताफलैः क्षीरमुच्चटेक्षुरकैः शृतम्
भोजने वानुपाने वा वृष्यार्थं सम्प्रयोजयेत् ८३

रसायनबस्तिष्वतिदेशः

रसायना बस्तयस्तु ये मया पूर्वदर्शिताः
तानेतैर्मांसनिर्यूहैर्योजयेत्कल्पकल्पितान् ८४
बभ्रूसूकरखड्गाश्च छागगोमहिषास्तथा

क्रौञ्चकारण्डवाः क्रौञ्चचक्रवाकबकास्तथा ८५
निरूहमेषां संहृत्य लाभतस्साधु योजयेत्

पनसबीजादिबस्तिः

क्षीरं पनसबीजानि कपिकच्छूफलानि च ८६
उच्चटेक्षुरबीजानि मधुकं तालमस्तकम्
पिप्पल्यश्शारिवा द्राक्षा खर्जूरो मदनान्यपि ८७
जीवकर्षभकौ मेदा बीजं नीलोत्पलस्य च
गर्भेणानेन संसिद्धं चटकाण्डरसायुतम् ८८
शर्करामधुसंयुक्त ---- ॥

इति भेल संहिता समाप्तम्